श्रीसीतामहिम्नि शास्त्रीयो दृष्टिनिक्षेपः

प्रो. जयकान्तसिंहशर्मा

सीतेति पुण्यं नाम भगवतोऽप्यन्तरङ्गतत्त्वस्य, पाथेयं पतिव्रतानां, परमाश्रयो भक्तानां, वशीकरणं मोक्षश्रियः, विरमणं सकलापदां, दृढतर-समाश्वासनं दीनानां, किम्बहुना द्व्यक्षरलक्षणमेव तद्वैदिकसंस्कृतेः। कदाचिदपि यच्चित्तं सर्वमनोऽभिरामाद्रामान्नापसर्पति, पातिव्रत्यस्य विमलरुचिर्नृत्यतीवाक्षिलक्ष्यीभवति यच्चरित्रस्मरणेन। यदीयं निरुपमं वात्सल्यं निःसीमधैर्यमतुलनीयं पातिव्रत्यम्, अनुपमं मार्दवमनुपमेयं शीलं प्रपन्नेषु चामोघं कारुण्यं सर्वत्र प्रकाशते संस्कृतवाङ्मये। यदीयञ्च सौम्यं सुस्निग्धं हृदयं विलोक्याग्निरपि चन्दनायते। या चाप्रतिमतपस्विनी परमात्मप्रेप्सूनां साधनशिक्षिका तपश्चरणाचार्या, यदशेषचरितं स्वकल्पनयाप्याकलयितुं न प्राभवत्कोऽपि कविरद्यावधि। तामेवामृतमयीं परमाह्लादमयीं राममयजीवितां भगवतीं सीतेति व्याहरन्ति महर्षयः। यदायत्तमखिलं वर्तमानं, यन्निबन्धना भगवतोऽपि भगवत्ता, यन्मूलं रमयतां वस्य रामस्य रामत्वं, किमधिकं यदाश्रित्य परिस्फुरति दृग् दृश्यञ्च, सैव प्रेमास्पदम्, ज्ञात्वाज्ञात्वा च जगत्तामेवोपास्ते, सैव सर्वत्राधत्ते सत्तां स्फूर्तिं सरसताञ्च। या च स्वयमशेषशक्तीनां मूलभूता, अनन्तकोटिब्रह्माण्डाधीश्वराधीश्वरी अचिन्त्योदयस्थितिलया अनन्तकल्याणगुणनिलयभूता महालक्ष्मीसहस्रसेवितपादपल्लवा श्रियामपि श्रीः, रघुनन्दनप्राणवल्लभा। यद्यपीयमयोनिजा तथापि जनकस्य देवयजनलाङ्गलपद्धतौ देवैः सकरुणं सम्प्रार्थ्याविर्भाविता। यथोक्तं भगवता श्रीमद्वाल्मीकिना- **जनकस्य कुले जाता देवमायेव निर्मिते**ति।[1] तद्वैभवमाह भवभूतिरेवम् –

विश्वम्भरा भगवती भवतीमसूत राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां येषां कुलेषु सविता च गुरुवर्यञ्च।।[2]

न तावदियं मैथिली सीरध्वजस्यैवापितु मिथिलाभवानामतीतानागतानां राजर्षीणामतिपवित्रेण निजचरित्रेण पावनी अलङ्कारभूता, सदाशयतापूर्णं यच्चरितं, मर्यादाशीलतायाः सा मौक्तिकमाला, यया सस्पृहमात्मानम-लङ्कृत्यापूर्वामेव श्रियमश्नुते भारतीयकुलबधूः, यामनसूययापि स्तुतां विदेहवंशवैजयन्तीं संस्मृत्य संस्मृत्य तथाविधदुरत्ययमपि पातिव्रत्यासिधारं ससुखमारोहति ललनाजनः। यदीयं महाभिजात्यं संस्तुत्य प्रत्यभिजानाति तां वाल्मीकिः –

---

1. वा. रा. 1-1-27
2. उत्तररामचरितम् 1.9

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इयं सा धर्मशीलस्य जनकस्य महात्मनः।
सुता मैथिलराजस्य सीता भर्तृदृढव्रता।।[3]

न केवलं वेदवेदान्तप्रतिपाद्यत्वात्पुरुषोत्तमत्वाद्वा श्रीरामस्य परत्वमपितु सर्वथाभिमतानुरूपसहधर्मिणीविशिष्टतयापि सर्वोत्तमत्वम्, ईश्वरत्वशङ्कास्पदानां ब्रह्मविष्णुरुद्राणामपि अग्न्यादिभिरैकराश्यसिद्धेः हिरण्यगर्भादीनामपि तदपेक्षयाऽसाधारणत्वात्तत्तत्पत्नीभ्यः सर्वमङ्गलास्पदत्वेन प्रमाणसिद्धायास्तस्याः श्रीराघवेन्द्रदिव्यमहिष्या उत्तमत्वं सिद्ध्यति। अत एवाहादिकविरपि – **सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधू**रिति।[4] न केवलमस्या लीलाविभूतौ पतिसम्बन्धप्रयुक्तः प्रकर्षः, अपितु विभूतिसम्बन्धेनापि। नित्यधाम्नि श्रीसाकेते श्रीहनुमदादिनित्यानां मुक्तानामप्येतत्परिजनपरिच्छेदभावेनैवावस्थानां विद्यते। नित्यविभूतावपि सृष्ट्यादिकारणभूतस्य भगवतो रामचन्द्रस्य तादृशकारणतां स्वापाङ्गैः प्रसाधयन्ती रामवल्लभा तस्य परत्वस्योत्तम्भिका भवति। स्वकीयापाङ्गैरङ्गीकारसूचिकया नयनलीलया स्वानुमोदनेन चेयं तादृशविधानव्यसनं सफलयति, अन्यथा जगत्सृष्ट्यादिलीला विरसा स्यात्, तदुक्तं श्रीवत्साङ्कमिश्रेण– **यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलम्। क्रीडेयं खलु नान्यथास्य रसदा स्यादैकरस्यात्तया।।** इति। यथा चेयं वाल्मीकिपदधोरणी –

स्मितविकसितगण्डं क्रीडविभ्रान्तनेत्रं मुखमवनमयन्ती स्पष्टमाचष्ट सीता।

सेयं रामप्रिया तदितरसर्वशेषित्वेन प्रथिता साकेतभवनस्य मङ्गलदीपरेखा भुवि दयनीयजीवदशां दर्शं दर्शं कारुण्यात्तदुद्दिधीर्षया निदानं भवति आत्मनो भगवतश्चावताराणाम्, **राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनी**ति व्यासोक्तेः। उभयभूतिनायिकाया दिव्यमहिष्या नित्यानपायिन्याः स्वसङ्कल्पनियता भवति स्वतन्त्रलीला। परस्परविश्लेषशोकप्रसङ्गरहितयोरपि तदभिनयमात्रमेव। भक्तरक्षादीक्षाया लीलाविभूतौ भगवन्तमनुधावन्त्यास्तस्या भगवतश्चोच्चावचं क्लेशमनुसन्धाय उद्वेलप्रेमभराविलस्वान्तैर्भक्तैः कृतेयं गुणनिन्दापि पर्यायोक्त्या व्याजसरण्या स्तुत्यामेव पर्यवस्यति –

नेतुर्नियसहायिनी जननि नस्त्रातुं त्वमत्रागता।
लोके त्वन्महिमावबोधबधिरे प्राप्ता विमर्दं बहु।
क्लिष्टं ग्रावसु मालतीमृदुपदं विश्लिष्य वासो वने।
जातो धिक्करुणां धिगस्तु युवयोः स्वातन्त्र्यमत्यङ्कुशम्।।[5]

हा हन्त, मातः कथमिव त एतावान् कारुण्याग्रहो निष्ठुरेऽपि जगति? मिथ्यारोपेण जीवनधनादपि वियोजयितारं वनवासेन चरणसङ्घट्टनेन व्यथयन्तमिमं लोकं धिक्। क्वेदं निर्व्याजकारुण्यं क्वेदं निर्दयं जगत्। प्रकृतपद्ये अवग्रहबलेन वनं जलं तद्विरुद्धेऽवने वह्नौ वास इत्यपि व्याख्यातुं युक्तम्। यथा

---

3. वा. रा. 5-16-15
4. वा. रा. 1-1-27
5. श्रीगुणरत्नकोशे 53

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लोके पृथिव्यां जनाःस्वसुखसाधनाय कर्षणखननाद्युपद्रवान् कुर्वन्ति, तान् ज्ञात्वपि पृथिवी प्रत्युपकारं कर्तुं नेहति प्रत्युत स्वव्यथामपि न प्रकटयति तथैवेयं पार्थिवी नित्यक्षमाशीला जयन्तादिकृताक्षम्यापराधान् क्षाम्यति। वनं गन्तुमुद्यता कैकेयीप्रदत्तवल्कलं हस्त आदाय **कथन्नु चीरं बध्नन्ति मुनयो वनवासिन**[6] इति स्वकान्तं पृच्छन्तीं मुग्धां विलोक्य वसिष्ठादीनामपि धैर्यं विलुप्तम्। अतस्तेनोक्तं जानकीवनगमनं निषेधता –

आत्मा हि दारा सर्वेषां दारसंग्रहवर्तिनाम्।
आत्मेयमिति रामस्य पालयिष्यति मेदिनीम्।।[7]

अत इयन्तदात्मा, आत्मा स्वशरीरे निगूढस्तिष्ठति। नाम्नैवास्या दुष्टाचरणस्यात्यन्तासम्भावनीयता सहिष्णुता च गम्यते। यथा चाहादिकविः –

सर्वान् भोगान्परित्यज्य भर्तृस्नेहबलात्कृता।
अचिन्तयित्वा कष्टानि प्रविष्टा निर्जनं वनम्।।[8]

तथाविधरावणसमक्षमपि स्वरूपनिरूपकं तन्निर्भयवचनं सदाचारप्रवणत्वमुद्गिरदाह मधुमयभणितीनां मार्गदर्शी महर्षिः –

शक्या लोभयितुं नाहमैश्वर्येण धनेन वा।
अनन्या राघवेणाहं भास्करेण यथा प्रभा।।[9]

चरणेनापि सव्येन न स्पृशेयं निशाचरम्।
रावणं किं पुनरहं कामयेयं विगर्हितम्।।[10]

युक्तमाह कविकुलगुरुः– **लङ्केश्वरप्रणतिभङ्गदृढव्रतं यद्वन्द्यं युगं चरणयोर्जनकात्मजाया**[11] इति। अतिमसृणं पङ्कजरजोऽपि तस्याः पादारुन्तुदं भवति, चेटीनां भृशावलोकनमपि अङ्गग्लानताहेतुर्भवति, अथापि साह – भर्तृवाल्लभ्यप्रकर्षादेव विश्लेषभीरुः सहनयनाग्रहगर्भं वचनम् –

अग्रतस्ते गमिष्यामि मृद्वन्ती कुशकण्टकान्।[12]

---

6. वा. रा. 2-37-12
7. वा. रा. 2-37-24
8. वा. रा. 5-16-19
9. 5-21-15
10. 5-26-6
11. रघुवंशे त्रयोदशे सर्गे - 78
12. वा. रा. 2-27-7

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

करपात्रस्वामिनस्त्वाहुः – सुषमाकामधेनुसौन्दर्यपयोराशिजन्यनवनीतनिर्मितं तत्स्वरूपम्, कमलादपि पेशलचरणा म्रदिमाधिष्ठात्री राजराजेश्वरी महात्रिपुरसुन्दर्यपि बहुर्भिर्हेतुभिस्तस्या उपमानपदवीं नार्हति।[13] स्वामिपादानामेतावत्कथनन्त्ववितथमेव यदैश्वर्यलक्ष्मी-विजयलक्ष्मी-माधुर्यलक्ष्मी-मोक्षलक्ष्मी-प्रभतयः समस्तलक्ष्म्यस्तत्र सहसैवोपतिष्ठन्ते यत्र श्रीसीताकृपाकटाक्षलेशोन्मेषो भवति। श्रीतुलसीदासानुसारं जानकी त्वनुपमेया, लक्ष्मीरपि कलङ्किचन्द्रसहोदरत्वाद्विषवारुणीसाहचर्यात् श्रारोदधिजन्यत्वाच्च न तत्साम्यं यास्यति, रूपवत्कच्छपमाश्रित्य शोभारज्ज्वा शृङ्गारमन्दरसहकारेण सौन्दर्यसुधापयोनिधेः रतिनाथपाणिभ्यां मन्थनेन समुत्थिता अप्राकृतलक्ष्मीरपि कदाचिदेव तत्साम्यं भजेदिति किमुत रक्षोरुधि राशनभीषण-भैरवी करालवदना काली वा। यदि प्रेमसारसर्वस्वं रामस्तदा सौन्दर्यसारसर्वस्वं सीता। रुचिकरमपि खाद्यं घृतशर्करायोगेन समधिकस्वादुतरं सत् सर्वस्पृहणीयं भवति तथैवानया ब्रह्मतत्त्वम्। यत्प्रपदनमात्रेण सर्वविधं तपस्तप्तं, हुतं स्तुतं, दत्तमाचरितं भवति किमधिकं कैवल्यमपि करतलायते। अस्या अनुग्रहलेशोऽपि अनन्तानिष्टनिवृत्तेरनन्ताभ्युदयसिद्धेश्च कारणं भवति, अतो नोपचारविशेषाग्रहः – **प्रणिपातप्रसन्ना हि मैथिली जनकात्मजे**ति[14] रामायणोक्तेः। मङ्कणसंहितानुसारं सस्मृहमीष्यमाणं करुणानिरीक्षणं लोकेशेशविभूतीनां कारणम्। तेनैव जगदिदं निरुपद्रवञ्च तिष्ठति, उपेक्षामात्रेण यन्निरीक्षणालाभतश्च नष्टं भवति न तु कोपतः, कः कुप्येद्वानरोत्तमेति वदन्त्यास्तस्याः कोपोदयासम्भवात्। अत एव पुरुषकाररूपायाः श्रीरामवल्लभायाः सर्वसमाश्रयणीयताज्ञापनाय तल्लोकोत्तरवैभवं प्रकाशयितुं श्रीसम्प्रदायाचार्यो भगवान् श्रीरामानन्दाचार्यः प्रसादसम्पत्प्रार्थनामुखेन युक्तं बभाण –

ऐश्वर्यं यदपाङ्गसंश्रयमिदं भोग्यं दिगीशैर्जगच्-
चित्रं चाखिलमद्भुतं शुभगुणा वात्सल्यसीमा च या।।
विद्युत्पुञ्जसमानकान्तिरमितक्षान्तिः सुपद्मेक्षणा।
दत्तान्नोऽखिलसम्पदो जनकजा रामप्रिया सानिशम्।।[15]

भगवत्स्वरूपादिषु किञ्चिदपि सीतयानन्वितं नास्ति, पञ्चरात्रे त्वस्य विस्तरः। श्रुतिरेकतस्तां **रामसन्निधिवशाज्जगदानन्ददायिनी**माह[16] अपरतश्च तत्सान्निध्याद्भगवत्पोषणं निरूपयति- **श्लिष्टः कमलधारिण्या पुष्टः कोसलजात्मज**[17] इति। रामवलोकनतत्परामिति।[18] श्रुत्यर्थमेव भवभूतिराह ललितसरण्या**स्नपयति हृदयेशं दुग्धकुल्येव दृष्टिरिति।**[19] तादृशनिरीक्षणेन जीवविषयककोप-विस्मारणेनानुकूल्यं सम्पादयति। वस्तुतस्तस्याः सादरपूर्णनिर्वर्णननित्यपात्रं भगवान् राघवेन्द्र एव, ब्रह्मादयस्तु नान्तरीयककटाक्षशीकररक्षणलक्ष्यम्। सत्यमाह कटाक्षनिपेक्षस्यैश्वर्यम्- **यद्भूभङ्गा प्रमाणं**

13. रामायणमीमांसा – प्रथमाध्याय 2.1
14. वा. रा. 5-27-46
15. वै. म. भा. – 2
16. रामतापिन्युपनिषद् 3-3
17. रामतापिन्युपनिषद् 3-8, 9
18. रामरहस्योपनिषद् 2-97
19. उत्तररामचरितम् 3-23

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्थिरचररचनातारतम्यं मुरारेरिति।[20] अन्वयव्यतिरेकाभ्यां देवादीनामैश्वर्यं तत्कटाक्षाधीनम्। स्थावरजङ्गमात्मकं जगद् भगवान् यत्कटाक्षतारतम्यं विलोक्यं तारतम्येन सृजति।

वस्तुतस्त्वभवाय मातृत्वैकरूपा जानकी एव प्रपदनीया, तावतैव सकलेष्टसिद्धेः। सर्वाभयहेतुः सर्वेश्वरो राघवेन्द्रोऽपि तदभिमतं नातिक्राम्यति। स हि तस्यां चाटुचञ्चुमनोरथ एवातस्तस्याः प्रसादे **क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु**[21] इति वदतः सर्वेश्वरादपि भयं नास्ति। सर्वापेक्षितदाने तयोः समानाभिप्रायत्वम्। एतेन परस्परानुकूलतया सर्वत्र व्यापारे सामरस्यं प्रतीयते। यथाभाणि वाल्मीकिना–

अस्या देव्या मनस्तस्मिन् तस्या चास्यां प्रतिष्ठितम्।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति।।[22]

उभयोरानुरूप्यन्त्वेतेन सिद्ध्यति–

तुल्यशीलवयोवृत्तां तुल्याभिजनकलक्षणाम्।
राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा।।[23]

तथापि माता हि हितादपि पुत्रस्य प्रियमेव पश्यति, पिता तूभयं पश्यति। प्रतापोष्मलपितृत्वदुरासदभगवत्समाश्रयसिद्धये वात्सल्यनिर्भरजानकीसमाश्रयणमेव युक्तम्, अनुग्रहैकस्वभावायाः कदाचिदपि निग्रहासम्भवात्। **आनृशस्यं परो धर्म**[24] इति स्मारयन्त्या नृशंसत्वप्रसङ्ग एव नास्ति, निग्रहरुचिस्तु अत्यन्तापकारिष्वपि न सम्भवति। **चन्द्रमा मनसो जात**[25] इत्युक्तरीत्या शीताशयोऽपि भगवान् अविच्छिन्नमहापराधान् जीवान् अवलोक्य यावद् मनाङ् निग्रहाभिमुखो भवति, तदैव इह दोषैकाश्रये जगति निर्दोषः कः, दोषदर्शनेन तव मनःकालुष्यं न युक्तमित्येवमपराधक्षमापनयोग्यैरालोकालापनीवीश्लथनादिभिरुपायैर्विस्मार्य वात्सल्यातिशयात् स्वजनयति श्रीजानकी। प्रथितमेव पितुर्हितपरत्वं मातुश्च प्रियपरत्वम्। यथोक्तं श्रीगुणरत्नकोशे–

पितेव त्वत्प्रेयान् जननि परिपूर्णागसि जने।
हितस्रोतोवृत्या भवति च कदाचित्कलुषधीः।
किमेतन्निदोषः क इह जगतीति त्वमुचितै-
रुपायैर्विस्मार्य स्वजनयसि माता तदसि नः।।[26]

---

20. श्रीगुणरत्नकोषः 4
21. गीता 16–19
22. 5–15–12
23. 5–16–5
24. वो. रा. 5–38–39
25. यजुर्वेदः 31–12
26. श्रीगुणरत्नकोश, 52

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वस्तुतस्तु सीता लक्ष्म्या अपि परात्परेति सर्वथा पदार्थसमन्वयाच्छ्रीपदेन सीताया ग्रहणं न तु लक्ष्म्याः, श्रीश्च ते लक्ष्मीश्च पत्न्यावित्यत्र भेदबोधकद्विवचननिर्देशाच्छ्रीपदस्य च पृथगुपादानात्। आम्नायसमाम्नातश्रीरामभक्तिपरम्परायां रामानन्दीयश्रीसम्प्रदायशब्देऽपि श्रीशब्दबोध्यं निपुणं विवृणोति श्रीमदग्रदेवाचार्यः - श्रीशब्देन समस्तसमाश्रयणीया परमात्माश्रितानिखिलदोषनिहन्त्री श्रीरामं भगवन्तं चेतनाचेतनविज्ञापनं श्रावयन्ती स्वगुणैरखिलं विश्वं पूरयन्ती भगवती सीतोच्यते।[27] उक्तार्थं पुष्णाति वैश्णवमताब्जभास्करोऽपि। सकलार्थलाभाय श्रियो घटकत्वन्तु षड्विधव्युत्पत्तिबललभ्यम्-

श्रिताप्यन्यैस्सर्वैः श्रयसि रमणं संश्रितगिरः।
शृणोसि प्रेयासं श्रितजनवचः श्रावयसि च।
शृणास्येतद्दोषान् जननि निखिलान् सर्वजगत
गुणैः श्रीणासि त्वं तदिह भवतीं श्रीरिति विदुः॥

अस्यामेव च सीतापदार्थोऽपि सिनोति आबध्नाति, वशीकरोति, सौभाग्यफलचारुतया भगवन्तम्। सीयते च तद्गुणमहिम्ना स्वयमपीति व्युत्पत्तेः। अत उच्यत आदिकविना- गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभिवर्धते।[28] वस्तुतस्तु नैषा श्रीरपितु श्रियोऽपि श्रीः, यथोक्तं वाल्मीकीये मन्दोदर्या-

वसुधाया हि वसुधां श्रियः श्रीं भर्तृवत्सलाम्।[29]

नूनं मङ्गलानां मङ्गलमित्यादौ भगवति श्रूयमाणमङ्गलत्वं श्रीसम्बन्धादेव। अत उच्यते- **तव स्पर्शादीशं स्पृशति कमले मङ्गलपदम्।**[30] तथा हि- वस्तुन उत्कर्षस्तन्निष्ठविशेषाधीनः किन्तु विशेषस्योत्कर्षस्तु न तस्याप्यधीनः, तस्य कथात्वस्य साहजिकत्वात्। अत एव **अप्रमेयं हि तत्तेजो यस्यैषा जनकात्मजेति**[31] रामायणोक्तं युज्यते। एवं भगवति परत्वसाधिकाया भगवत्याः सीतायाः परत्वमनन्याधीनमेव। अत उच्यते- **तवेदं नोपाधेरुपनिपततिश्रीरसि यत** इति। तद्यथा पुष्पितस्य प्रशस्तिः परिमलाधीना, परिमलस्य तु सा कस्याप्यधीनेत्यशक्यं वक्तुम्। अतः परिमलस्थानीयायाः श्रीसीताया निरुपाधिकमङ्गलत्वं पर्यवसीयत। एवं निरूपणेनापि अनन्याधीनविभवत्वेन भगवन्तं गृणती श्रुतिर्न विरुध्यते। न हि स्वकीयसम्पदोत्कृष्यमाणो महाराजोऽन्याधीनो भवति, तदायत्तवैभवोऽपि रामचन्द्रः, अपराधीनप्रभाव एव। प्रभया हि रत्नस्य महार्घता, न हि तावता रत्नस्य नैयून्यमापतति नित्याश्रयत्वात्। प्रभास्थानीयता च पराम्बिकायाः स्ववचनसिद्धैव - **अनन्या राघवेणाहं भास्करेण यथा प्रभा।**[32]

---

27. श्रीमदग्रदेवाचार्यविरचितरहस्यत्रयम् 2.7
28. वा. रा. 1-77-27
29. 6-111-21
30. श्रीगुणरत्नकोषः 29
31. श्रीगुणरत्नकोषः 29
32. वा. रा. 5-21-15

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भगवच्छब्दवाच्यं षाड्गुण्यं तत्पूर्वकसौलभ्यसौशील्यदयावात्सल्यादिकमात्मगुणजातं नित्यकैशोर-लावण्यादिविग्रहगुणजातं च शरण्यदम्पत्योः श्रीसीताराघवयोः समानं तथापि भगवदपेक्षया केचन विलक्षणौदार्यक्षमाप्रभृतयो गुणाः सन्त्येव, अञ्जलिभरं वहते पुरुषार्थचतुष्टयं प्रदायापि नोचितं प्रदत्तमिति सलज्जायास्तस्या औदार्यकाष्ठा। आश्रितानुद्दिश्य भगवत्यमोघः पुरुषकारः, आर्द्रापराधास्वपि राक्षसीषु निर्हेतुकी क्षान्तिरित्यादिगुणगणो देव्यन्तरादिमां व्यतिरेचयति। किम्बहुना तत्प्रीतिपारवश्यादेव तत्सन्निधौ भगवान् अपराधिनोऽपि दण्डयितुं नोत्सहते। जीवैकपक्षपातिनीयं प्रभोर्निग्रहसंकल्पमपि अनुग्रहसङ्कल्परूपेण परिणमय्य जीवधन्यतामापादयति। कस्यापि स्वसमक्षममङ्गलं द्रष्टुं नार्हति, अत एव तत्सन्निधावक्षम्यापराधं कृत्वापि जयन्तो रक्षितः, सान्निध्याभावे रावणवालिप्रभृतयो व्यापादिता इति प्रसिद्धमेव। जयन्तं विभीषणं च शरणवरणोक्तिक्षमावेव भगवान् रक्षति, शरणवरणं हि रक्षणनिमित्तम्। इयं कृपैकमतिस्तु रावणवधानन्तरं तद्वधापरिज्ञानेन अविरतापराधा राक्षसीरपि हनुमतो चित्रवधान्निवार्य रक्षितवती, तदानीमनयोक्तं वचनं वैष्णवैर्मन्त्रधिया जप्यते–

पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम।
कार्यं कारुण्यमार्येण न कश्चिन्नापराध्यति।।[33]

तस्या इमामेवातिलोकक्षमाशीलतां स्तुवन्नाह श्रीगुणरत्नकोशकारः–

मातर्मैथिलि राक्षसीस्त्वयि तदेवार्थापराधास्त्वया।
रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता।
काकं तं च विभीषणं शरणमित्युक्तिक्षमौ रक्षतः।
सा नः सान्द्रमहागसस्मुखयतु क्षान्तिस्तवाकस्मिकी।।[34]

भगवान् बादरायणस्तु एतदीयगुणान् गायन् न तृप्यति, सङ्गृह्णाति च पतिवशीकरणगुणानेवम्–

प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती।
धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः।।[35]

परिगणयति च रम्यगुणान् तत्प्राणनाथोऽप्येवमेव तद्वशंवदः–

इयं गेहे लक्ष्मीरियममृतवर्ती नयनयो–
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।।[36]

---

33. 6–113–45
34. श्रीगुणरत्नकोशः 50
35. श्रीमद्भा. 9–10–56
36. उत्तररामचरितम् 1–38

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीसीतानूपुरक्वाणेन विलसद्विग्रहो भगवानाम्नायस्तु तद्गुणगणौघमणिकोशगृहम्। तत्र पूर्वकाण्डे श्रीसूक्तश्रद्धासूक्त-मेधासूक्त-उत्तरनारायणसूक्तेषु अस्येशाना जगतः श्रद्धया देवो देवत्वमश्नुते, इत्यादिवाक्यैः हिरण्यवर्णा सुवर्णरजगस्त्रजा-चन्दा-लक्ष्मी-अनपगामिनी-हस्तिनादप्रबोधिनी-देवी-श्री-का-सोत्स्मिता-आर्द्रा-ज्वलन्ती-तृप्ता-तर्पयन्ती-देवजुष्टा-उदारा-प्रभृतिभिः परस्सहस्रैः पदैश्च दिव्यगुणकथनपूर्वकं तत्स्वरूपं प्रतिपाद्यते। अत एव सीतैव जगत्स्वामिनीति मत्वा तदाभिमुख्यकामनया वन्दते वेदः-

अर्वाची सुभगे भव सीते वन्दामहे त्वा।
यथा नः सुभगाससि तथा नः सुफलाससि॥[37]

अत्र केचन सीता लाङ्गलपद्धतिरितिकोषादन्यथा व्याख्यातुं प्रायतन्त, तन्मुधैव जडपूजाप्रसङ्गात् सुभगेत्यादिचेतनविशेषणविषयकवन्दनाद्यनन्वयात् नित्यनिरवद्ये वेदे प्रमत्तत्वारोपाच्च। एवमेवेन्द्रः सीता निगृह्णात् घृतेन मधुना समस्तेत्यादयो मन्त्राश्चरितविशेषपरत्वेनान्वेतव्याः। श्रीसीतातत्त्वावेदिकासु सीता-राम-पूर्व-तापनीय-श्रीरामोत्तरतापनीय-रामरहस्य-तारसाराद्युपनिषत्सु स्वरूपविवेचनदृशा सीतोपनिषत् सर्वातिशायिनी। यत्र चैवं सा स्तूयते -

इच्छाज्ञानक्रियाशक्तित्रयं यद्भावसाधनम्।
तद् ब्रह्मसत्तासामान्यं सीतातत्त्वमुपास्महे॥

मूलप्रकृतिरूपत्वात्सीता प्रकृतिः स्मृता।
प्रणवप्रकृतिरूपत्वात्सीता प्रकृतिरुच्यते।

कालातीता भगवती सीता चित्स्वरूपेति तारोपनिषत् त्रिलोचनायाः शारदाम्बाया रूपेणापि सा ध्येयेत्यादिशति रामरहस्योपनिषत्-

रामाभिरामां सौन्दर्यसीमां सोमावतंसिकाम्।
पाशाङ्कुशधनुर्बाणधरां ध्यायेत्त्रिलोचनाम्॥[38]

महामैथिल्युपनिषदि राममन्त्रपरम्परां स्वयं ब्रूते मैथिली- इममेव मनुं पूर्वं मां साकेतपतिरवोचत्, अहं हनुमते मम प्रियाय इत्यादि। किम्बहुना, उपनिषदो ब्रह्मा शिवो विष्णुर्वा परतत्त्वमिति संशये श्रीसीतया नित्यसाहचर्यादेव श्रीवत्साङ्कं भगवन्तं रामं विलोक्यैव सीतापतित्वमेवेश्वरलक्षणमिति तमेव परत्वेनावधार्य तत्त्वचिन्तां तरन्ति। न केवलमुपनिषत्प्रमाणकस्तन्महिमा अपितु श्रीमद्रामायणं महाभारतं महर्षिप्रणीतं स्मृतिपुराणादिकमपि तन्महिम्नि प्रमाणम्। **काव्यं रामायणं कृत्स्नं सीताशश्चरितं महत्**[39] इति वाल्मीक्युक्तेस्तदुज्ज्वलचरित्रेणैव गुरुतरं विद्यते। वस्तुतस्तु रामायाः = सीताया अयनमेव रामायणमन्यथा अविकत्थनत्वादिलक्षणविशिष्टस्य धीरोदात्तनायकस्य रामचन्द्रस्य महानुभावं चरितं

37. ऋग्वेदः 4-57-6
38. रामरहस्योपनिषत् 2-33
39. वा. रा. 1-4-7

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निबोधतेत्युक्त्वा रामायणं प्रतीक्ष्य स्वगुणश्रवणाग्रहोऽविकत्थनत्वभङ्गाद् विरुद्ध्यते। सतीाचरितप्रधानत्वादेव तत्संगच्छते। तत्रेष्टां **सर्वस्य जगत**[40] इत्यादिकथनात्तस्याः माधुर्यावृतमपि परत्वन्तु तत्र तत्र प्रकाशितमेव। कृपायाः पतिपारतन्त्र्यस्यानन्यार्हत्वस्य च प्रतिपादनात्तन्महत्त्वम्। द्वितीयविश्लेषे पतिनियमनानतिक्रमणेन वाल्मीक्याश्रमे तस्या निवासात्पारतन्त्र्यं प्रकाशितम्, तृतीयविश्लेषे च पृथगाश्रयानवलम्बनेन भूमौ प्रवेशादनन्यार्हत्वं प्रकाशितम्। वेदवतीरूपेण विष्णवे तत्तपोवर्णनं लभ्यते। अद्भुतरामायणे सीतया कालीरूपेण सहस्रमुखरावणस्य वधः, सीतासहस्रनामद्वारा रामेण तत्स्तवनमित्यादिचरितवैचित्र्यं वर्णितमस्ति। एवं रामायणान्तरेऽपि तन्महिमज्ञापकचरितान्तरं विलसति। महारामायणे जानकीपदारविन्दयोश्चिह्नितानामष्टा-चत्वारिंशच्चिह्नानां विशदं वर्णनं लभ्यते। अत्रैव सीतायाः श्रीभूलीलाभिस्तिसृभिः सेव्यत्वं निर्दिश्यते[41]। श्रीभूलीलातथोत्कृष्टा कृपायोगोन्नती तथा पश्यति भृकुटीस्तस्या जानक्या नित्यमेव च कूपपतितबालरक्षणव्याकुला जननीव जीवैकपक्षपातिनी श्रीरामभामिनी विप्रशापाद्रावणादिरूपेण परिणतान् राक्षसान् उद्धर्तुं भुवि तथैवावातरत्।

दुस्सहपतिवियोगं सोढ्वापि लङ्कायां तावत्तया स्थितं हनुमतो भगवत्प्रापणाग्रहमुपेक्ष्य यावत्स्वपतिना तदुद्धारो न कारितः। अध्यात्मरामायणे च हनुमज्जिज्ञासोपशमनाय मैथिली स्वयमाह- **रामो न गच्छति न तिष्ठती**त्यादिना तत्कर्तृत्वादिकं निरस्य तत्सान्निध्यादहमेव सर्वं करोमीति। एतत्सर्वमद्वैतसिद्धान्त-प्रभावितमिव प्रतीयते।[42] आनन्दरामायणे मनोहरकाण्डे चतुर्दशसर्गे सीताकवचमष्टोत्तरशतनाम विन्यस्तमिति। अत्रैव सीतायास्त्रिरूपतायाः समुल्लेखः, सत्त्वेन रामवामाङ्के, रजोरूपेणाग्नौ, तमोरूपेण रावणनाशाय पञ्चवट्यां च निवासो निरूपितः। अद्भुतरामायणे वर्णितं रावणदुहितृत्वादिकन्तु न विशेषोपस्थापकम्। बुल्केसमीक्षितं सीताचरितं नोपादेयं करपात्रस्वामिनापि रामायणमीमांसायां भृशं तस्य दूषितत्वात्।

वेदेषु बीजतया निर्दिष्टस्य शक्तितत्त्वस्योपबृंहणं पश्चान्नानातन्त्रेषु पुराणेषु चाभूदिति विदितमेव विद्वत्सु। वैष्णवीयपाञ्चरात्रवैखानसागमेषु सीतातत्त्वं बहुधा निरूपितम्। तद्यथा-अहिर्बुध्न्य-जया-बृहद्ब्रह्म-विष्णु-सदाशिव-पाद्म-लक्ष्मी-मङ्कण-लोमश-काश्यप-हिरण्यगर्भ-वसिष्ठ-वाल्मीकि-अगस्त्याख्यसंहितासु प्रियाप्रियतमयोः श्रीसीतारामयोः नामरूपलीलाधाम्नां विशदं वर्णनमुपलभ्यते। अगस्त्यसंहितायां शिवकृतं जानकीस्तवनं **वन्दे विदेहतनयापदपुण्डरीकमि**त्यादि सश्रद्धं वैष्णवमन्दिरेषु जोघुष्यते। अत्र भगवता रामेण स्वस्य सीताधीनता न्यरूपि निपुणम् -

तदाराध्यस्तदारामस्तदधीनस्तया विना।
तिष्ठामि न क्षणं शम्भो! जीवनं परमं मम॥

वाल्मीकिसंहितायां श्रुतिभिः कौ मे पितराविति पृष्टे ब्रह्मणा सीतारामयोस्तन्मातापितृत्वेन कथनं विलसति, तद्यथा-

---

40. 5-15-30
41. महारामायणे 48-13
42. अ.रा. 1-1-34, 42

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तमेव जानकीं वित्त जननीमात्मनः परामिति। लोमशसंहिताया अष्टस्वध्यायेषु पिप्पलादलोमशसंवादे जानक्यास्तत्सखीनाञ्च सहकारेण विविधरासवर्णनं विद्यते। वाल्मीकिसंहितायामेव श्रीराममन्त्रस्य परम्पराया: समुल्लेखो विद्यते। आसु संहितासु मधुरोपासनाया बीजमपि निहितम्।

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी जानबलक्रिया चेति[43] श्रुत्या ज्ञानबलक्रियाशक्तिरूपेण पराशक्तिर्निर्दिश्यते। इयमेव संवित्सन्धिनी आह्लादिनीरूपेण च निगद्यते। मैथिली तु शक्तित्रयमयी। आनन्दरूपब्रह्मणो द्वैविध्यंषडैश्वर्यप्रधानं तिरोहितषडैश्वर्यं च। **कुतोऽन्यथा स्याद्रमतः स्व आत्मन**[2] इति भागवतोक्ते विश्वनाथचक्रवर्ती एवमेव परमतत्त्वं चिच्छक्तिवृत्तिभेदेन महासारेण प्रेमाख्येनानादित एव द्विधा विभक्तं भवति। अत आत्मारामो नाम सीतारमण: सीताया: स्वरूपशक्तित्वेनात्मभूतत्वात्। मधुरोपासनायां परानुक्तेर्माधुर्ये पर्यवसानं मत्वा भगवद्रते: प्रेमस्नेहमानप्रणयरागानुरागक्रमेण महाभावत्वं यावत्पाकानुरोधाद् गतिर्मन्यते। तत्र रूढाधिरूढक्रमेण मोदनमादनभेदभिन्नाया भगवद्रतेर्मादनभावोदयस्तु केवलं श्रीजनकनन्दिन्यामेव। रसिकाश्च श्रीराघवेन्द्रं परमपुरुषं श्रीजानकीमाह्लादिनीं मत्वोभयोरभेदाद्रसरूपतां निश्चित्य लोकोत्तरसम्बन्धकल्पनेन सखीभावेन सेवमाना मधुरलीलादर्शनेनात्मानं कृतार्थयन्ति। अत्रोज्ज्वलरसस्यालम्बनविभावरूपेण श्रीमैथिलीराघवौ स्वीक्रियेते, तत्र मैथिली नित्यकुञ्जेश्वरी नित्यकिशोरी सखीप्रणयाधीना सङ्गीताभिज्ञा गन्धोन्मादितराघवा नर्मपण्डिता उज्ज्वलस्मिता परम-कमनीया राघवहृदयेश्वरीत्यादिरूपेणाङ्गीक्रियते, राघवोऽपि प्रियामोहननवकिशोर- शृङ्गाररसोचितरसिकशेखररूपेण च। उभयोरभिमतकैङ्कर्येण प्रसादनमेव रसिकानां जीवनोद्देश्यम्। श्रीकिशोरीकृपाभिमानिनी जीवा सखी एवमभिलषति। रामस्नेहिदासविरचिते जानकीचरितामृते सा च स्वस्वामिनीपादावनतं प्रसादनपरं कोसलकिशोरमवलोकयितुमीहते-

यावन्न कान्तं नतमस्तकं प्रियं मानान्वितां प्राणसमां कृताञ्जलिम्।
सम्मानयन्तं ह्यवलोकयाम्यहं तावन्न मे जातु च शान्तिरेष्यति।।[44]

इयं मधुरोपासकानां स्वामिनी आराध्या ध्येया गेया साध्या च। तन्नखमणिचन्द्रिकायां कोटिब्रह्मज्योत्स्नामपि न्यक्कुर्वन्ति रसिका:। दाक्षिणात्येषु श्रीशठकोपविष्णुचित्तप्रभृतीनां जन्मसिद्धालवाराणामुत्तरोत्तरमभिवर्धमाना श्रीसीताभक्ति: प्रथतेतराम्, मिथिलाभावोपासको विष्णुचित्त: स्वपुत्रीं तुलसीवाटिकायां लब्धाविर्भावां गोदां श्रीसीतावतारतया रामं च जामातरं मत्वा तद्दास्यैकरसाभिमानेन कालमनैषीत्। लोकाचार्यैस्तु सीतापरत्वभावं दधानैरपराधपराणां कृते सौलभ्येन भगवत्प्राप्तये सीताशरणागतेरेव युक्तता प्रत्यपादि श्रीवचनभूषणटीकायाम्। यद्यपि श्रीरामानुजसम्प्रदाये तैलङ्गीया: श्रियोऽणुत्वेन जीवत्वं निरूप्यापि प्रपत्तौ तदसाधारणमहत्त्वं समर्थयन्ति किन्तु श्रीवेदान्तदेशिकप्रभृतयस्तु श्रियो जीवत्वमसहमाना न्यायसिद्धाञ्जनादौ उभयोरपि ज्ञानानन्दस्वरूपत्वं जगदुत्पादकत्वं शेषित्वं शरण्यत्वं प्राप्यत्वं च निरूप्य दृढतरं प्रत्याचक्षत।[45]

---

43. श्वेताश्वतरोपनिषद् 6-8
44. श्रीमद्भागवतम् 5-19-5
45. न्यायसिद्धाञ्जनम् - ईश्वरपरिच्छेद: - श्रीतत्त्वनिरूपणम् पृ. 496

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तद्यथा कर्मकाण्डे महेन्द्रदेवतात्वे नेन्द्रो देवता किन्तु महत्त्वविशिष्ट इन्द्रो देवता तथैव श्रीविशिष्टो भगवान् ब्रह्म शेषी वा। एवमेवास्या मम च शेषं हि विभूतिरुभयात्मिकेति वचनात् पत्युः पत्न्या अपीति लोकाच्च, उभयाधिष्ठानं चैकं शेषित्वम् अविभागस्मृतेः। पूर्वमीमांसायां षष्ठाध्याये **लिङ्गंविशेषनिर्देशात् पुंयुक्तमैतिशायनः** इति सूत्रे यजेतेत्यत्र एकत्वेऽपि स्वत्वस्योभयनिष्ठत्वादुभाभ्यां द्रव्यत्यागस्य सम्पाद्यत्ववर्णनं लभ्यते। किञ्चाग्नीषोमीययागे उभयोरपि एकदेवतात्वं यथा तथैव श्रीसीतारामयोरेकं शेषित्वम्। श्रीप्रपदनमन्तरेण भगवत्प्रपत्तिरपि न साफल्यमेति। अतः श्रीनामसम्पर्कसमुज्ज्वले रामानन्दीयश्रीसम्प्रदाये षडक्षरतारकश्रीराममन्त्रपरम्पराप्रवर्तकत्वेन सम्प्रदायाचार्यत्वेन उपायत्वेनोपेयत्वेन श्रीसीताया महत्त्वातिशयो विद्यते। एतत्परम्परानुवर्ती गोस्वामितुलसीदासोऽपि सीतावैभवं वन्दनमुखेन तथाह यथा तदैश्वर्यं समुद्गतं स्यात्–

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम्।
सर्वश्रेयस्करीं सीतां नतोऽहं रामवल्लभाम्॥[46]

पण्डितराजो भगवदाचार्यः श्रीसीतास्तवे श्रीदिव्यदर्शने मातृस्तवे लोकोत्तरजगदम्बाश्रयणे च भक्त्या तस्या निरुपाधिकक्षमाशीलतां न्यरूपयत्। तद्यथा–

दशास्यो दुर्वादं व्यतनुत च मर्माविधमपि
तथा राक्षस्यस्तेऽपरिमितिविपत्तीररचयन्।
तथापि क्षाम्यन्त्या जननि करुणापुण्यजलधे-
र्महिम्नस्ते पारं व्रजितुमिह शक्तो भवतु कः॥[47]

रामानन्दीये प्रपत्तिमार्गे श्रीस्वामिन्या जनकनन्दिन्यास्तावदुन्नतं स्थानं येन सकलसाधनानां पर्यवसानं तद्वरिवस्यायामेव क्रियते, तदैककृपाकटाक्षलिप्सया अद्यापि न विश्राम्यति तत्स्तुतिरचनाप्रवाहः। यथेदं श्रीरामभद्राचार्यस्य पद्यम् –

पुरीपुरन्ध्रिकेशमल्लिकालिजुष्टनूपुरे
गुणावलिविलुब्धवेदभृङ्गभूरिभूसुरे।
दिनेशवंशमण्डिते समस्तशास्त्रपण्डिते
कदा विधास्यसीह मां कृपाकटाक्षभाजनम्॥[48]

प्रायः सर्वेऽपि संस्कृतकवय ऐश्वर्यमाधुर्यमिश्रणसरण्या तच्चरितमुन्नयन्ति, तथापि वाच्यस्त्वया मद्वचनात्स राजा, दिष्ट्या अपरिहीनराजधर्मः स राजेति वचनाभ्यां भवभूतिकालिदासोल्लिखिताभ्यां

---

46. श्रीरामचरितमानसस्य बालकाण्डीयं पञ्चमं पद्यम्
47. भगवदाचार्यकृतपराम्बास्तोत्रात
48. स्वामिश्रीरामभद्राचार्यकृतश्रीजानकीकृपाकटाक्षस्तोत्रात्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्या ईषत्क्षोभप्रकाशस्तु न युक्तस्तस्याः प्रकृतिसिद्धशीलाननुरूपात्। तुलसीदासस्त्वेवंविधवर्णनदोषमपाकृत्य निरूपयति। मानसे वर्णिता सीता तु स्वकान्तैश्वर्यं स्मारं स्मारं तादृशकण्टाकाकीर्णवनमार्गेऽपि भगवत्पदचिह्नयोरन्तराले विन्यस्यति स्वपदं सभीता, तथावन्दनीयपदचिह्नयोरपि स्वपद्भ्यां स्पर्शे धर्मलोपभयात्। स्वप्रियस्य युद्धाभिनयनमपि द्रष्टुमशक्तेति तादृशलीलातः प्रागेव लक्ष्मणद्वारा सा गह्वरे दूरं प्रातिपा। निग्रहलीला तु प्रतिबिम्बभूता सीतापि न सहते, रामचन्द्रकिरणरसरसिकचकोरिका भित्तौ चित्रितमपि कपिं विलोक्य बिभेति, कथं तादृशराक्षसीमध्ये तावत्स्थितेति चित्रमेव। ज्वलन्तीं लङ्कां विलोक्य हनुमतो रक्षार्थमग्नेः प्रार्थनापरा सा ब्रवीति अनुग्रहैकस्वभावा- **यदि वा त्वेकपत्नीत्वं शीतो भव हनुमत**[49] इति। मुनिजनरक्षणरूपं क्षात्त्रधर्ममनुसन्धाय तन्नपाशसमुद्यतं स्वरमणं ततो निवारयितुं प्रवर्तते वनवासिजनोचितानृशस्यधर्मस्मारणेन।

जगदीश माया जानकी,
उभय बीच श्री सोहति कैसी। ब्रह्म जीव बिच माया जैसी॥
मोरि यह माया.....

इत्यादि-मानसोक्तस्य जानकीस्वरूपनिरूपकत्वेन प्रयुक्तस्य मायाशब्दस्य न मिथ्यावचनत्व-मनिर्वचनीयत्वं वार्थः किन्तु कृपावचनत्वमेवेयं भगवतः कृपास्वरूपा शक्तिरिति तात्पर्यस्य **माया दम्भे कृपायाञ्चेति** कोषसम्मतत्वात्। मिथ्यावचनत्वे तु तद्धेयतापत्तिः। अत एव चाभासत इत्यस्य स्थाने शोभते इति प्रयोगः सङ्गच्छते। अत एव तत्प्रणयाधीनत्वादेव **मायामृगं दयितयेप्सितमन्वधावदि**ति।[50] भागवतोक्तं युज्यते। तुलसीदासानुसारमग्निपरीक्षणादिकन्तु तत्र विन्यस्तायास्ततः पुनरवाप्यते, तदैश्वर्यप्रकाशनाय च। युक्तमभाणि भवभूतिना- **उत्पत्तिपूरितायाः किमस्याः पावनान्तरैः**।[51]

नूनं ललितकला यस्या नीराजनं, तादृशरमणीयमूर्तेस्तस्या विलोकनेन लज्जिता दामिनी चिरं नावतिष्ठते। वस्तुत एतत्सौन्दर्येणैव साहित्ये सौन्दर्यलक्षणमासादितम्, सौन्दर्यसृष्टिरप्यनुप्राणिता। लोके चेयमेवार्हति लोकाभिरामं स्वकान्तं तद्रहस्यं वितरीतुम्, मुखदर्शनोत्सवे कौसल्ययाऽस्या एव करपल्लवे समर्पितत्वात्। स हि नीलमणिरस्या एव गुप्तधनम्। अतः सीतास्नेहसित एवेह लोकोऽसितो भवितुमर्हति सकृद्रसाबद्धश्च नार्हत्यात्मानं मोचयितुं न चेहते रसिकः। रामप्रियाप्रसादे ब्रह्मावाप्तिस्तु सतुरामेव सिद्ध्यति भूमिजैकविस्रम्भभूमीनां तल्लुब्धं तदञ्चलोपान्ते प्रणयप्रकर्षेण नित्यबद्धं नित्यकिशोरं कमनीयं ब्रह्म अमिलित्वा क्व यास्यति? प्रस्तुतोऽयं समुद्यमो नाग्निवत्स्वरूपपरीक्षणे किन्तु तद्गुणेषु लेखनीव्यापारेण तत्प्रसादाय वन्दने।

---

49. वा. रा. 5-53-27
50. श्रीमद्भागवत् 11-5-34
51. उ.रा.च. 1-13)

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham